# परमावश्यकं हि पर्यावरणसंरक्षणम्

**(म.म. राष्ट्रपति-सम्मानित) प्रो. वैद्य बनवारी लाल गौड़**
पूर्व कुलपति,
डॉ. एस. आर. राजस्थान आयुर्वेद विश्वविद्यालय जोधपुर

संहिताकालेदेशानांत्रिविधत्वमाख्यातम्, अधुनापित्रिविधत्वमेवनिर्दिशन्त्यायुर्वेदज्ञाः । देशानामेतेषां निर्धारणं विशिष्टैर्लक्षणैर्विहितम्। यानिलक्षणानि निर्दिष्टानि चरकसंहितायांतानि तु तस्मिन्नेव काल उपलब्धा आसन्, यथा हि-

**त्रिविधःखलुदेशः- जाङ्गलः, आनूपः, साधारणश्चेति।**

तत्रजाङ्गलःपर्याकाशभूयिष्ठः, तरुभिरपिचकदर-खदिरासनाश्वकर्ण-धव-तिनिश-शल्लकी-साल-सोमवल्क-बदरी-तिन्दुकाश्वत्थ-वटामलकीवनगहनः, अनेकशमी-ककुभ-शिंशपाप्रायः, स्थिरशुष्कपवनबलविधूयमान-प्रनृत्यत्तरुणविटपः, प्रततमृगतृष्णिकोपगूढतनुखरपरुषसिकताशर्कराबहुलः, लावतित्तिरिचकोरानुचरितभूमिभागः, वातपित्तबहुलः, स्थिरकठिनमनुष्यप्रायोज्ञेयः, अथानूपोहिन्तालतमालनारिकेलकदलीवनगहनः, सरित्समुद्रपर्यन्तप्रायः, शिशिरपवनबहुलः, वञ्जुलवानीरोपशोभिततीराभिःसरिद्भिरुपगतभूमिभागः, क्षितिधरनिकुञ्जोपशोभितः, मन्दपवनानुवीजितक्षितिरुहगहनः, अनेकवनराजीपुष्पितवनगहनभूमिभागः, स्निग्धतरुप्रतानोपगूढः, हंस-चक्रवाक-बलाका-नन्दीमुख-पुण्डरीक-कादम्ब-मद्गु -भृङ्गराज-शतपत्र-मत्तकोकिलानुनादिततरुविटपः, सुकुमारपुरुषः, पवनकफप्रायोज्ञेयः; अनयोरेवद्वयोर्देशयोर्वीरुद्वनस्पतिवानस्पत्यशकुनिमृगगणयुतः स्थिरसुकुमारबलवर्णसंहननोपपन्न-साधारणगुणयुक्तपुरुषःसाधारणो ज्ञेयः॥

उपरि निर्दिष्टानां वृक्षाणां वनस्पतीनां वा चतुर्विधत्वं निर्दिष्टम्--

वनस्पतिस्तथावीरुद्वानस्पत्यस्तथौषधिः । तदपि लक्षणैरेव ज्ञायते, यथा – यत्र हि केवलानां फलानामेव प्रत्यक्षरूपेण दर्शनम्भवति स तु वनस्पतिः (यद्यप्यत्र पुष्पाणामदृश्यता वर्तते, विनापुष्पैःफलैर्युक्तावटोदुम्बरादयः। यदुक्तंहारीते- “तेषामपुष्पाःफलिनोवनस्पतयइतिस्मृताः”इति), पुष्पैःफलैरपि च वानस्पत्यः निर्धारितः (यथा ह्याम्रलकुचदाडिमादयः, पुष्पैर्वानस्पत्यःफलैरपीतिपुष्पानन्तरंफलभाजइत्यर्थः), ओषध्यःफलपाकान्ताः (फलस्यपाकादन्तोविनाशोयेषांतिलमुद्गादीनांतेफलपाकान्ताः; अत्रकेचित्फलपाकान्ताःपाकान्ताश्चौषध्यइतिवदन्ति;

तेनविनाऽपिफलंपाकेनैवान्तोयेषांदूर्वादीनांतेऽपिगृह्यन्ते|), प्रतानैर्वीरुधःस्मृताः (प्रतानशब्देनलतागुल्माश्चगृह्यन्ते| यदुक्तंहारीतेन- ''लतागुल्माश्चवीरुधः''इति)।

आयुर्वेदे त्वेषांमूलत्वक्सारनिर्यासनाल(ड)स्वरसपल्लवाः क्षाराःक्षीरंफलंपुष्पंभस्मतैलानिकण्टकाः पत्राणिशुङ्गाःकन्दाश्चप्ररोहाश्चोपयुज्यन्ते । एषश्चोद्भिदोगणः प्रोक्तः । यद्यपि भेषजद्रव्यं तु त्रिविधं प्रोक्तं- जङ्गमौद्भिदपार्थिवम्| तत्र मधूनिगोरसाःपित्तंवसामज्जाऽसृगामिषं विण्मूत्रचर्मरेतोऽस्थिस्नायुशृङ्गनखाःखुराः केशालोमानिरोचनाश्च जङ्गमेभ्यःप्रयुज्यन्ते। भौमद्रव्याणि तु सुवर्णंसमलाःपञ्चलोहाःससिकताःसुधा मनःशिलालेमणयोलवणंगैरिकाञ्जनेत्यादीनि भेषजकार्ये प्रयुक्तानि तानि तानि कर्माणि कुर्वन्ति प्रयुक्तानि यथाविधि ।अस्मादेव हि कारणादायुर्वेदोपयोगिद्रव्यस्वरूपंसर्वं पाञ्चभौतिकंकार्यद्रव्यं भेषजोपयोगि वर्तते।

प्रसङ्गवशादेव त्रिविधद्रव्याणामेवात्रोल्लेखो विहितोऽन्यथा तु वनस्पत्यादीनां केवलानामौद्भिद्द्रव्याणामेवोल्लेखस्यात्रावश्यकताऽऽसीत्। यतो हि देशानां त्रैविध्यं तु तदधिकृत्यैव विहितः। यथा हि पूर्वमुल्लिखितं यद्वर्तमानकालेऽपि देशानां त्रैविध्यं संस्वीक्रियते वनस्पत्यादीनां संस्थित्यनुसार्येव । किन्तु वनस्पत्यादयस्त्वेते न राजन्ते तत्तद्देशे। यतो हि वनानां वनस्पत्यादीनाञ्च विद्ध्वंसो जातः तैस्तैस्तु बहुभिः कारणैः। अनेन हि पर्यावरणेऽसन्तुलनं सञ्जातम्। तेन च वायूदकदेशकालेष्वपि विसङ्गतिः सञ्जाता , कारणादस्माच्च स्वस्थस्य स्वास्थ्यसंरक्षणं न भवति नवीनाश्च प्रादुर्भूताः रोगाः जनानामारोग्यनाशङ्कुर्वन्ति।

वर्तमानकाले कृषिकार्येष्वोषधीनामधिकोत्पादनार्थं वनस्पत्यादिभिश्चाधिकफलप्राप्त्यर्थं हानिकारकरासायनिकद्रव्यप्रधानानां कृत्रिमाणामुर्वरकाणामन्येषाञ्च विषात्मकानां द्रव्याणामुपयोगङ्कुर्वन्ति कृषिवैज्ञानिकाः कृषकाश्च । तेन हि विरुद्धवीर्यात्मकानां हीनवीर्याणाञ्च द्रव्याणामुत्पत्तिर्जायते, भूमेश्चोर्वराशक्तिर्विनश्यति, ऊषरा तु जायते भूमिः, हि बहुविधानां येऽपीहभूमेरत्यूषरादेशास्तेष्वोषधि-वीरुद्वनस्पतिवानस्पत्यानजायन्तेऽल्पतेजसोवाभवन्ति, लवणोपहतत्वात्| अत एव भिषजः शस्त्रात्मकस्य भेषजस्याप्यल्पबलत्वाद्वैद्याः रोगान्निवारयितुं हन्तुं वा समर्थाः न भवन्ति।

एतादृग्विधानामोषध्यात्मकानामन्नानां शाकानां कन्दानां फलानाञ्च प्रयोगेणपुरुषाः खालित्यपालित्यादिभिः जुष्टाः भवन्तिवलयश्चाकालेभवन्ति तेषाम्।

शरीरं तु पाञ्चभौतिकमस्ति। शरीरस्थितदोषाः पञ्चमहाभूतानां प्रतिनिधयः सन्ति। लोकेऽपि पञ्चमहाभूतानां संस्थितिः वर्तते। शरीरस्य शीर्णनं प्रतिक्षणं भवति, वस्तुतस्त्वेतच्छीर्णनं पाञ्चभौतिकतत्त्वानामेव भवति। शीर्णनाच्च शरीरे ह्येतेषां तत्त्वानां संक्षयो भवति, क्षयस्य चास्य पूर्तिः पाञ्चभौतिकतत्त्वपरिपूर्णेनाहारेण जायते, अस्मादेव हि कारणात्

प्रतिदिनं सन्तुलितस्य चाहारस्य ग्रहणेन क्षपितानां तत्त्वानां पूर्तिः क्रियते, क्रमेऽस्मिन्भूमौसमुत्पन्नानांवनस्पत्यादिभिःसमुत्पन्नानामाहारजातानांशाककन्दमूलफलादीनाञ्चोपयोगोभवतिशीर्यमाणस्यपाञ्चभौतिकस्यशरीरस्यपोषणार्थम्। आचार्यः कथयति-

**पञ्चभूतात्मके देहे ह्याहारः पाञ्चभौतिकः।**
**विपक्वः पञ्चधा सम्यग्गुणान् स्वानभिवर्द्धयेत्। (सु.सू. 46/526)**

**भौमाप्याग्नेयवायव्याः पञ्चोष्माणः सनाभसाः।।**
**पञ्चाहारगुणान्स्वान्स्वान्पार्थिवादीन्पचन्ति हि।। (च.चि. 15/13)**

शरीरे त्वेतादृशी व्यवस्था वर्तते यत्-यदात्मकस्य तत्त्वस्य शरीरे क्षयः जायते तस्य तस्यैव हि तत्त्वस्य (क्षुधा-पिपासेत्यादिरूपेण) आकांक्षा शरीरेण क्रियते। यथा हि-

**यद्यदाहारजातं तु क्षीणः प्रार्थयते नरः।**
**तस्य तस्य स लाभे तु तं तं क्षयमपोहति।। (सु.सू. 15/30)**

आहारतत्त्वानां ग्रहणन्तु लोकात् (प्रकृतितः) क्रियते। लोकस्तु विशिष्टेन पर्यावरणेन संरक्षितः संनद्धः वर्तते। यदा सोमसूर्यानिलादिभिः पर्यावरणे विकृतिः जायते तदा ह्येतेष्वाहारतत्त्वेष्वपि विकृतिर्जायते।

अनेन सुस्पष्टम्भवति यल्लोकस्य पुरुषस्य च न केवलं साम्यमपितु परस्परमवलम्बनमाश्रयत्वमपि च विद्यते। यावदेकस्य संस्थितिः वर्तते तावदपरस्य, यावच्चैकस्य विकृतिः विनाशश्चारभते, तावदपरोऽपि तत्प्रभावप्रभावितः प्रभवत्येव। यथा शरीरे (पुरुषे) कफपित्तवायवः प्रकृतिविकृतिकारकाः सन्ति तथैव लोके सोमसूर्यानिलाः प्रकृतिविकृतिकारकाः सन्ति। यथा-

**विसर्गादानविक्षेपैः सोमसूर्यानिलाः यथा।**
**धारयन्ति जगद्देहं कफपित्तानिलास्तथा।। (सु.सू. 21/8)**

लोके सोमसूर्यानिलादीनां स्थितिमभिलक्ष्य कालज्ञैर्जनैर्कालनिर्धारणं कृतम्। यतो ह्येतेषां स्थितेः शरीरधारिणामुपरि प्रभावः जायते। अस्मादेव हि कारणात्-ऋतुविभागेन षडङ्गं संवत्सरं स्वीकृतम्। प्रभावस्त्वादानविसर्गरूपेण शरीरे यथा जायते तन्निर्दिष्टमाचार्य-चरकेण-

"इह खलु संवत्सरं षडङ्गमृतुविभागेन विद्यात्। तत्रादित्यस्योदगयनमादानं च त्रीनृतूञ्छिशिरादीन् ग्रीष्मान्तान् व्यवस्येत्,

वर्षादीन् पुनर्हेमन्तान्तान् दक्षिणायनं विसर्गं च" (च.सू.६/४)

व◌ि सर्गादानयोर्लक्षणम्-

विसर्गे पुनर्वायवो नातिरूक्षाः प्रवान्ति, इतरे पुनरादाने; सोमश्चाव्याहतबलः शिशिराभिर्भाभिरापूरयञ्जगदाप्याययति शश्वत्, अतो विसर्गः सौम्यः। आदानं पुनराग्नेयं, तावेतावर्कवायू सोमश्च कालस्वभावमार्गपरिगृहीताः कालर्तुरसदोषदेहबलनिर्वृत्तिप्रत्ययभूताः समुपदिश्यन्ते ।।

तत्र रविर्भाभिराददानो जगतः स्नेहं वायवस्तीव्ररूक्षाश्चोपशोषयन्तः शिशिरवसन्तग्रीष्मेषु यथाक्रमं रौक्ष्यमुत्पादयन्तो रूक्षान् रसांस्तिक्तकषायकटुकांश्चाभिवर्धयन्तो नृणां दौर्बल्यमावहन्ति।।

वर्षाशरद्धेमन्तेषु तु दक्षिणाभिमुखेऽर्के कालमार्गमेघवातवर्षाभिहतप्रतापे, शशिनि चाव्याहतबले, माहेन्द्रसलिलप्रशान्तसन्तापे जगति, अरूक्षा रसाः प्रवर्धन्तेऽम्ललवणमधुरा यथाक्रमं तत्र बलमुपचीयते नृणामिति (च.सू.६/५-७)

विसर्गादानपरकस्य षड्ऋत्वात्मकस्य संवत्सरस्य प्रकृतिविकृतिस्वरूपे पर्यावरणसन्तुलनस्य परमं महत्त्वं विद्यते।

क◌ि ◌ं पर्यावरणम्-

पर्यावरणस्वरूपज्ञानक्रमेऽस्य परिभाषाया उल्लेखः सर्वप्रथमं क्रियते -

1. पर्यावरण में वे सभी कारक अन्तर्निविष्ट हैं जो केवल व्यक्तिगत पादपों के ही नहीं अपितु पादपों के समुदाय को भी प्रकाशित करते हैं।

2. All the conditions circumstances and influences surroundings and affecting the development of an organism or group of organisms after contrasted with heredity (webster's dictionary)

उपर्युक्त-परिभाषामाध्यमेन सुस्पष्टमेतद् यत् लोके ये मूर्तिमन्तः भावविशेषाः सन्ति, ते परस्परमभिभूताः सुसम्बद्धाः सुनियताः सुसंस्थिताः च विद्यन्ते। एकैकस्मिन्नपि भावे यदाऽनियतता सम्पद्यते तदा विपर्य्ययक्रमः प्रारभ्यते। भावेषु सुनियततया सृष्टिविकासक्रमः चलति, तथाऽनियततया विनाशक्रमः क्रमेण सम्पद्यमानः प्रलयमुपस्थापयति। एवं सृष्टेः उत्पत्ति-स्थिति-विनाशाश्च चक्रवत् परिभ्रमन्ति।

**पुरुषः प्रलये चेष्टैः पुनर्भावैर्वियुज्यते।।**

**अव्यक्ताद्व्यक्ततां याति व्यक्तादव्यक्ततां पुनः।**

**रजस्तमोभ्यामाविष्टश्चक्रवत् परिवर्तते।।**

**येषां द्वन्द्वे परा सक्तिरहङ्कारपराश्च ये।**

**उदयप्रलयौ तेषां न तेषां ये त्वतोऽन्यथा।। (च.शा.१/६७-६९)।।**

प्राचीनैर्महर्षिभिः प्रोक्तं-यत् लोकस्थितभावविशेषाः शरीरस्थितभावविशेषाणां सम्पूरणं संरक्षणञ्च कुर्वन्ति। एवमेव शरीरिणः स्व-स्वकार्ये निरताः सन्तः लोकस्थितभावविशेषाणां सम्पूरणं संरक्षणञ्च कुर्वन्ति। परस्परं भावयन्तो ह्येते भावाः सृष्टिचक्रसञ्चालने योगदानं कुर्वन्ति। सर्वेष्वेतेषु भावेषु पञ्चभूतानां सन्निवेशः वर्तते। एतेषां महाभूतानां स्थूलत्वं सूक्ष्मत्वञ्च ब्रह्माण्डे परितः व्याप्तम् अस्ति। अनेन सुस्पष्टं यत् लोकस्थित-भावविशेषा एव पर्यावरणकारकाः सन्ति।

पुरुषे लोके च पूर्णरूपेण साम्यं स्वीकृतं महर्षिभिः। आचार्य चरकः कथयति यत्-पुरुषोऽयं लोकसंमितः। यतो हि-यावन्तो हि लोके मूर्तिमन्तो भावविशेषास्तावन्तः पुरुषे यावन्तः पुरुषे तावन्तो लोके। लोके चापरिसंख्येया अवयवविशेषाः पुरुषावयवविशेषा अप्यपरिसंख्येयाः। लोकः षड्धात्वात्मकः वर्तते, तद्यथा-

पृथिव्यापस्तेजो वायुराकाशं ब्रह्म चाव्यक्तमिति। एवमेव च पुरुषोऽपि षड्धात्वात्मकः वर्तते, यथाः-खादयः पञ्च (आकाशवायुतेजोजलपृथिव्यः) चेतनाषष्ठा एते समुदिताः षड्धातव एव 'पुरुष' इति शब्दं लभन्ते। अस्मात् कारणात् सर्वलोकमात्मन्यात्मानं च सर्वलोके समनुपश्यतः सत्या बुद्धिः समुत्पद्यते। सर्वलोकं ह्यात्मनि पश्यतो भवत्यात्मैव सुखदुःखयोः कर्ता नान्य इति।

अतएवकालेऽस्मिन्विचारणीयोह्येषःविषयोऽस्तियत्वनानांविनाशेनजनानांविनाशोऽपिविविधप्रकारेणभवत्येव । त्रिविधस्यदेशस्ययल्लक्षणात्मकंविभाजनमाचार्येणचरकेणकृतंकिंदेशानांतदात्मिकासंस्थितिःवर्तमानकालेवर्तते?यद्यपि पर्यावरणसंरक्षणेबह्व्यःसंस्थाःबहवश्च विशेषज्ञाः सन्नद्धाः सन्ति, तेषां प्रेरणया स्थाने स्थाने भूमौ वृक्षाणामारोपणं क्रियते पर्वतेषु वनेषु च बीजप्रक्षेपणं क्रियते वनानामुच्छेदनं वनस्पतीनाञ्चलवनं निषिद्धं दण्डात्मकञ्च वर्तते । पुनरपि विभिन्नैः कारणैः हीयन्ते वनानि रोदति च वनदेवी पर्यावरणस्य चासन्तुलनं भवत्येव रोगाः प्रादुर्भवन्ति प्रसरन्ति च महामारी-स्वरूपात्मकैः कोरोनासदृशैः भयङ्करैश्च रोगैः जनपदा उद्ध्वंसतां यान्ति।

अत्र विचारणीयं तथा करणीयमेतद्वर्तते यज्जनाः पर्यावरणसंरक्षणक्रमे नदीनां स्वच्छीकरणं पर्वतानाञ्च सन्दोहननिवारणं वनानाञ्च वनस्पतिभिः समृद्धीकरणमित्यादयः यत्कुर्वन्ति तत्र देशकालप्रकृतिसंस्कृतीनाञ्चापेक्षावश्यकरूपेण करणीया वर्तते । विशेषेण तु वृक्षारोपणकार्यक्रमे भेषजात्मकानां तद्देशोपयुक्तानां वृक्षाणां वनस्पतिवानस्पत्यवीरुदोषध्यात्मकानामेव संरोपणं बीजवपनं वा करणीयम्।

पर्याकाशभूयिष्ठे जाङ्गले हि देशे कदर-खदिरासनाश्वकर्ण-धव-तिनिश-शल्लकी-साल-सोमवल्क-बदरी-तिन्दुकाश्वत्थ-वटामलकीत्यादीनामेव संरोपणं समुचितम् ।आनूपस्तु देशःहिन्तालतमालनारिकेलकदलीवनगहनः करणीयः, नदीनां संरक्षणं समुद्राणाञ्च सौन्दर्यीकरणे समीपस्थपङ्कमयानूपक्षेत्रेषु पल्वलेषु च वञ्जुलवानीरोपशोभिततीरःसरिद्भिरुपगतभूमिभागो भवेत् येन च समाकृष्टाः जनाः यत्र तत्रोपविश्यमन्दपवनानुवीजितक्षितिरुहगहनस्य, अनेकवनराजीपुष्पितवनगहनभूमिभागस्योपभोगं कुर्वन्नान्दिताः भवेयुः।

एवमेव हि लक्षणानुरूपिणीं व्यवस्थां सम्पादयन् साधारणदेशेऽपि समुचितवनस्पतियुक्तानामुपवनानां संरचनां विधाय पर्यावरणसंरक्षणे तस्य सुखदा सहभागिता भवेदिति करणीयम्।यतो हि स्वास्थ्यसंरक्षणक्रमे रोगाणामपवारणे तथा यैः कैरपि कारणैः सञ्जातरोगाणां निवारणे वनस्पतीनामोषधीनाञ्च परमोपयोगिता भवति । जनानां जीवनस्य सुचारुरूपेणारोग्यपूर्वकं यापनं भवेत् ।नह्यतःपापात्पापीयोऽस्तियदनुपकरणस्यदीर्घमायुः, तस्मादुपकरणानिपर्येष्टुंयतेत इत्युपदिशन्ति तज्ज्ञाः।

स्वस्थो जनः कृषिपाशुपाल्यवाणिज्यराजोपसेवादीनि कर्माणि तथायानिचान्यान्यपिसतामविगर्हितानि कर्माणिवृत्तिपुष्टिकराणिविद्यात्तान्यारभेतकर्तुं; तथाकुर्वन्स दीर्घजीवितंजीवति। स्वकर्मणि निरतः स्वधर्मपरिपालने च रतः जनः स्वस्यसंरक्षणं परिजनानां संरक्षणं समाजस्य संरक्षणं जनपदस्य च संरक्षणं सामाजिकनियमानां शासकीयनियमानाञ्च परिपालनं तथा स्वधर्मपरिपालनञ्च यदा करोति तदा सर्वपरिपालनं स्वत एव सञ्जायते । एतेषां परिपालनेन पर्यावरणपरिपालन संरक्षणञ्चापि भवत्येव तच्च परमावश्यकम्। इति।